SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-3, (Jul-Sep) 2025

# न्यायवेदवदनमतपदलक्षणविमृष्टिः
# Nyāyavedavadanamatapadalakṣaṇavimṛṣṭiḥ

**Soumen Chakraborty**
Assistant Professor
Nayagram Pandit Raghunath Murmu Govt. College
Nayagram, West Bengal, India
Email: soumensans17@gmail.com

**Abstract:** शब्दावलम्बी जगद्व्यवहारः। वस्तु वीक्ष्यानुभूय वा शब्दव्याहृतिः विपश्चिदविपश्चदोः। श्रोतापि संगृह्य शब्दं प्रवर्तते निवर्तते वा। प्रवर्तननिवर्तनात्मकव्यवहारो वाक्यमध्यगः। वाक्यं वारेण पदानाम्। अतो वाक्यावयवस्य पदस्य विमृष्टिविषयता न हीयते। परन्तु तल्लक्षणनिरूपणे विवदन्ते नैयायिकाः वैयाकरणाश्च। सा विमतिरेव संशयजनिका। तां संशीतिं शातयितुमेव 'न निर्णीतेऽर्थे न्यायः प्रवर्तते, किं तर्हि? संशयितेऽर्थे'[1] इत्यभियुक्तोक्तिमनुस्मरत् यत्नसमवेतो मदात्मा।

**Keywords**: पदम्, शक्तिः, लक्षणा, सुबन्तम्, तिङन्तम्।

मनुजानां वक्तव्यं श्रोतव्यं च शब्दाधीनमिति प्रायोवादः। शब्दव्यतिरेकेण प्रतिदिवि व्यवहारसम्पादनेऽपारगा वयम्। व्यवहारराहित्यात् जगदिदं तमोलिप्तं प्राणशून्यमिवाभाति। तत्र शब्दः प्रकाशं जनयति। अतः ज्योतिस्सम्मितं शब्दं प्रशंसन्ती कविगवी –

'इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥'[2] इति।

अतो हिताहितप्राप्तिपरिहारार्थं नः शब्दसमूहात्मकं वाक्यम्।। वाक्यं च पदसन्दोहैः – 'पदसमूहो वाक्यमर्थपरिसमाप्तौ'[3] इति। अत्र घटितस्य ज्ञानं घटकज्ञानसापेक्षमिति न्यायेन वक्तुमलं पदपदार्थप्रतिपत्तिपूर्विका वाक्यवाक्यार्थप्रतिपत्तिः। अपि चास्ति शास्त्रनिर्देशः – 'अपदं न प्रयुञ्जीत' इति। यन्न पदं न तत्प्रयोज्यम्। ननु किं तावत् पदलक्षणम्? नैयायिकाः वैयाकरणाश्चात्र विप्रतिपद्यन्ते। तां विप्रतिपत्तिजविचिकित्सावारणाय प्रबन्धोऽयं बन्धितः।

पद्यते गम्यते अर्थः अनेन इति विग्रहे पद्धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'[4] इति पाणिनीयशासनेन अचि पदमिति शब्दो निष्पद्यते। महर्षिणा पाणिनिना अष्टाध्याय्यां पदसंज्ञाविधायकानि चत्वारि सूत्राणि सूत्रितानि। तानि च भवन्ति – 'सुप्तिङन्तं पदम्'[5], 'नः क्ये'[6], 'सिति च'[7], 'स्वादिष्वसर्वनामस्थाने'[8] चेति।

**सुप्तिङन्तं पदम्** – सूत्रमिदं पदद्वयात्मकम्। तत्र सुप् च तिङ् चेति विग्रहे इतरेतरद्वन्द्वसमासे सुप्तिङौ। सुप्तिङौ अन्ते यस्य (समुदायस्य) इति विग्रहे अनेकमन्यपदार्थे इत्यनेन बहुव्रीहिः। तेन सुप्तिङन्तमिति। 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति न्यायेन अन्तपदस्य सुपा तिङा च सम्बन्धो भवति। तेन सुबन्तं तिङन्तं चेति लभ्यते। अत्र पदमिति संज्ञा, सुप्तिङन्तमिति संज्ञि। तेन सुबन्तं तिङन्तं च पदसंज्ञं स्यादिति सूत्रार्थो लभ्यते। सूत्रे सुप् तिङ् चेति प्रत्याहारौ। 'सुप्' इत्यनेन स्वादिसुबन्ताः एकविंशतिः प्रत्ययाः (सु, औ, जस्, अम्, औट्, शस्, टा, भ्याम्, भिस्, ङे, भ्याम्, भ्यस्, ङसि, भ्याम्, भ्यस्, ङस्, ओस्, आम्, ङि, ओस्, सुप् चेति) गृह्यन्ते। 'तिङ्' इति तिबादीनामष्टादशप्रत्ययानां (तिपि, तस्, झि, सिप्, थस्, थ, मिप्, वस्, मस्, त, आताम्, झ, थास्, आथाम्, ध्वम्, इट्, वहि, महिङ् चेति) संज्ञा। सूत्रे सुबित्यनेन कथं प्रत्याहारस्यैव ग्रहणं न तु सुप् इति सप्तमीबहुवचनस्येति शङ्का समुदेति। अत्र समाधिस्तावत् 'न ङिसम्बुध्योः' इति प्रतिषेधात् सुप् इति प्रत्याहारस्य ग्रहणं, न प्रत्ययस्य। यदि सप्तमीबहुवचनस्य सुपो ग्रहणं स्यात्तर्हि ङ्यन्तस्य सम्बुध्यन्तस्य च पदत्वाभावाल्लोपस्य प्राप्तिरेव न स्यात्। तेन प्रतिषेधोऽनर्थको भवेत्।

**नः क्ये** – पदद्वयात्मकेऽस्मिन् सूत्रे नः इति प्रथमैकवचनान्तं पदम्। अत्राकार उच्चारणार्थकः। क्ये इति सप्तम्यन्तं पदम्। पूर्वसूत्रात् सुबिति पदमिति चानुवर्तेते। सुबित्यनेन सुबन्तस्य ग्रहणम्। प्रत्ययग्रहणे प्रत्ययान्तग्रहणमिति परिभाषया न इत्यत्र तदन्तविधिना नान्तमिति लभ्यते। नान्तमिति सुबन्तस्य विशेषणम्। एवञ्च सूत्रार्थः समायाति – क्ये परतः नान्तं सुबन्तं पदसंज्ञं भवतीति। सूत्रे क्ये इति पदेन क्यच्, क्यङ् चेति प्रत्यययोः ग्रहणम्। क्यषस्तु क्यपदेन ग्रहणं न लोहितडाज्भ्यः क्यष्वचनमिति वार्तिकोक्तेः हलन्तात्क्यषोऽभावात्। एवं सूत्रार्थः सिद्धान्तकौमुद्यां प्रोक्तः 'क्यचि क्यङि च नान्तमेव पदं स्यात्, नान्यत्' इति। क्यचि उदाहरणं राजीयति आत्मनो राजानमिच्छति इति विग्रहे। क्यङि राजायते इति।

**सिति च** – सूत्रेऽस्मिन् पदद्वयं विलसति। तत्र सिति इति सप्तम्येकवचनान्तं पदम्। चेति अव्ययम्। स् सकारः इत् यस्य सः सित् इति बहुव्रीहिः। सुप्तिङन्तं पदमिति सूत्रात् पदमित्यनुवर्तते। तेन सूत्रार्थो भवति – सिति प्रत्यये परतः पूर्वं पदसंज्ञा स्यादिति। अहंयुः, शुभंयुः चेत्यादिकमस्योदाहरणम्। 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्'[9] इति परिभाषया एतत्सूत्रविहिता पदसंज्ञा भसंज्ञाबाधिका। एवमस्य सूत्रस्य मुख्यं प्रयोजनं भसंज्ञाबाधनम्।

**स्वादिष्वसर्वनामस्थाने** – सूत्रमिदं पदद्वयात्मकम्। तत्र स्वादिष्विति सप्तमीबहुवचनान्तं पदम्। असर्वनामस्थाने इति सप्तम्येकवचनान्तं पदम्। अत्र बहुत्वे विवक्षितेऽपि एकवचनमार्षम्। सूत्रार्थः कौमुद्यां – कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं पदं स्यादिति। राजभिः राजभ्याम् इत्यादिकमत्रोदाहरणम्।

एतेषु 'अपदं न प्रयुञ्जीत' इति निषेधशास्त्रसम्बद्धं हि 'सुप्तिङन्तं पदम्' इति सूत्रम्। शासनमिदं सुबन्तस्य तिङन्तस्य च पदसंज्ञां विधत्ते। सुबन्तं नाम सु औ जस् इत्यादीनि यथायोग्यम् एकविंशतिसंख्यकानि प्रत्ययानि अन्ते सन्ति यस्य तत्समुदायः। यथा – रामेण। राम इति प्रातिपदिकात् टाप्रत्यययोगात् पदमिदं निष्पद्यते। इदं च सुबन्तम्। तथा तिप् तस् झि इत्यादीनि अष्टादशसंख्यकानि तिङ्प्रत्ययानि यथायोग्यम् अन्ते सन्ति यस्य तत्समुदायस्य तिङन्तम् इति संज्ञा। यथा – गच्छति। गमनार्थकगम्धातोः झिप्रत्यये रूपमिदं जायते। वैयाकरणाः इमं सुबन्तं तिङन्तं च पदसंज्ञया अभिदधते।

नैयायिकाः पदसंज्ञायां वैयाकरणेभ्यो भिन्नतां प्रकटन्ति। तैः पदलक्षणं लक्षितं – 'शक्तं पदम्'[10] इति। शक्तं नाम शक्तिविशिष्टम्। शक्तिश्च ईश्वरेच्छा इच्छामात्रं वा इति न्यायसमयः। पदपदार्थयोर्मध्ये इयमिच्छारूपा शक्तिस्तिष्ठति। पदे चेयं शक्तिर्निरूपकतासम्बन्धेन पदार्थे च विषयतासम्बन्धेन वर्तते। अतः नैयायिकैः प्रकृतिप्रत्ययादीनामपि पदत्वमुरीकृतम्। अत्रेदं स्मर्तव्यं केवलस्य शक्तिविशिष्टस्य पदत्वे उल्लिखितेऽपि शक्तिपदेन लक्षणायाः अपि ग्रहणं कार्यम्, अन्यथा लक्षणया अर्थस्योपस्थितौ लाक्षणिकशब्दे न पदसंज्ञा प्रसज्येत। अतः शक्तमिति पदमुपलक्षणम्। तेन शक्तिरिति शक्तिलक्षणयोर्बोधं जनयेत्। उक्तञ्च आचार्येण विश्वनाथन्यायपञ्चाननेन – वृत्तिमत्त्वं पदत्वमिति[11]। वृत्तिर्नाम शक्तिः लक्षणा च।

इत्थं पर्यालोचनया नैयायिकवैयाकरणमतयोर्भेदस्तु ज्ञायते यत्, धातुप्रकृतिकतिङन्तानां प्रातिपदिकप्रकृतिकसुबन्तानां पदत्वमुररीकुर्वन्ति शाब्दिकाः। परन्तु प्रकृतिप्रत्ययादीनपि पदं वदन्ति तार्किकाः, तेषामपि शक्तिविशिष्टत्वात्। किञ्च, शास्त्रे प्रकृतिप्रत्ययादीनाम् अर्थाः अपि निरूपिताः। इत्थं प्रातिपदिकं, धातुं, प्रत्ययञ्च पदं वदन्ति नैयायिकाः।

ननु प्रबन्धप्रारम्भे या अभियुक्तोक्तिरुल्लिखिता 'अपदं न प्रयुञ्जीत' इति, तामनुसृत्य प्रकृतिप्रत्ययौ पृथक्तया शक्यप्रयोगौ वाक्ये नैयायिकैः, तयोरपि शक्तिमत्त्वेन शास्त्रे निरूपितत्वात्। अत्रोच्यते, वाक्ये केवलस्य प्रत्ययस्य केवलायाः प्रकृतेर्वा प्रयोगोऽकर्तव्यः, शिष्टप्रयोगरूपेण अविवेचितत्वात्[12]। सर्वत्रैव सुबन्तस्य तिङन्तस्य च प्रयोगो दरीदृश्यते। अतः सुबन्तस्य तिङन्तस्य च पदस्य वाक्ये प्रयोगार्हता।

वस्तुतस्तु न्यायसिद्धान्तमुक्तावल्यादिग्रन्थे या पदसंज्ञा निर्दिष्टा सा न्यायसूत्रे तत्त्वचिन्तामणौ वा नोपलभ्यते। अपि तु वैयाकरणसिद्धान्तानुरूपैव संज्ञा न्यायसूत्रे प्राप्यते – 'ते विभक्त्यन्ताः पदम्'[13] इति। विभक्तियुक्ताः वर्णाः एव पदाभिधेयत्वमधिरोहन्ति। जयन्तभट्टेनापि विभक्त्यन्तस्य पदत्वमुल्लेखि – 'पदं न विभक्त्यन्तो वर्णसमुदायो न प्रातिपदिकमात्रम्'[14] इति। किञ्च, शक्तं पदमिति लक्षणे स्वीकृते राजपुरुषः, वीणापाणिः इत्यादीनि वाक्यानि भवेयुः, न तु पदानि। परन्तु व्यवहारे तेषामपि पदत्वस्वीकारात् वैपरीत्यं विलक्ष्यते। अपि च, तल्लक्षणानुसारं पाचकपङ्कजप्रभृतिशब्दाः शक्तैः प्रकृतिप्रत्ययादिभिः निष्पन्नाः वाक्यरूपोपपन्नत्वात् अशक्ताः भवन्ति, नैयायिकैः वाक्ये शक्त्यस्वीकारात्[15]। परन्तु पाचकादिशब्दान् ते पदत्वेन उल्लिखन्ति। अतो दृश्यते व्यत्ययः। वाक्ये

प्रयोगयोग्यतां परिलक्ष्यैव विश्वनाथकविराजेन प्रदत्तं पदलक्षणं – 'वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः'[16] इति। अतः प्रयोगयोग्याः अनन्विताः एकार्थबोधकवर्णाः पदम्।

अत्रोदेति शङ्का, किं पूर्वोक्ता नव्यनैयायिकस्वीकृता पदसंज्ञा ग्राह्या उत हानीया? अत्र समाधारूपेणेदमेव वाच्यं – शास्त्रे भूप्रभृतिप्रकृतीनामर्थाः निरूपिताः। तानि अपि पदानि। परन्तु वाक्ये साक्षात्तेषां प्रयोगयोग्यता न विद्यते। तानि शाब्दबोधादिशास्त्रव्यवहारसमाधये उपयोगीनि, शाब्दबोधे 'पदार्थः पदार्थेनान्वेति' इत्यादिनियमाङ्गीकारात्। यर्हि प्रकृतिप्रत्ययादीनां शक्तत्वं नाङ्गीक्रियते तर्हि अर्थमप्रकाशयन्ति तानि पदार्थानाम् अन्वयसिद्धौ विघटकानि भवेयुः। अन्वयासिद्धौ न शाब्दमतिः। वस्तुतस्तु शुद्धं सुवर्णं यथा क्षणभङ्गुरत्वात् वनिताकायकमनीयतासिद्धौ अलङ्काररूपतां न परिदधति तथैव पर्याप्तार्थबोधनाक्षमत्वात् केवला शक्ता प्रकृतिः केवलः शक्तः प्रत्ययो वा वाक्ये अप्रयोज्यः। अतो नैयायिकाभिमतं शक्तपदलक्षणं शास्त्रीयकार्यसम्पादने सहायकं सदपि लौकिकव्यवहारदृष्ट्या न ग्राह्यम् इति शिवम्।

## Endnotes

1. न्यायसूत्रभाष्यम्, पृष्ठम् - ३५
2. काव्यादर्शः, पृष्ठम् - १४
3. अर्थशास्त्रम्, पृष्ठम् - २९४
4. अष्टाध्यायी – ३.१.१३४
5. तदेव – १.४.१४
6. तदेव – १.४.१५
7. तदेव – १.४.१६
8. तदेव – १.४.१७
9. परिभाषेन्दुशेखरः, परिभाषासंख्या - ६०
10. तर्कसंग्रहः, पृष्ठम् - ४४०
11. न्यायसूत्रवृत्तिः, पृष्ठम् - ६५९
12. न केवला प्रकृतिः न केवलः प्रत्ययः प्रयोक्तव्यः – सरूपाणामेकशेष एकविभक्तौ इति सूत्रभाष्ये। पृष्ठम् - १२०
13. न्यायसूत्रम् - २.२.५८, पृष्ठम् - ६५४
14. न्यायमञ्जरी, पृष्ठम् - ५३
15. भाषापरिच्छेदः, पृष्ठम् - ४५२
16. साहित्यदर्पणः, पृष्ठम् - ३०

## Bibliography


- अन्नंभट्टः। *तर्कसंग्रहः* (दीपिकासहितः)। सम्पादकः नारायणचन्द्रगोस्वामी। कलिकाता : संस्कृत पुस्तक भाण्डार, १४२३ (पुनर्मुद्रणम्)
- कौटिल्यः। कौटिलीयमर्थशास्त्रम् (प्रथमखण्डम्)। सम्पादकः मानवेन्दुबन्द्योपाध्यायः। कलिकाता : संस्कृत पुस्तक भाण्डार, २०१४ (षष्ठसंस्करणम्)

- गौतमः। *न्यायदर्शनम्* (भाष्यवार्तिकतात्पर्यटीकावृत्तिसहितम्)। सम्पादकौ तारानाथन्यायतर्कतीर्थः अमरेन्द्रमोहनतर्कतीर्थश्च। दिल्ली : मुन्सिराम मनोहरलाल पाब्लिसार्स प्राइवेट् लिमिटेड्, १९८५ (द्वितीयसंस्करणम्) (१९३६-१९४४, प्रथमप्रकाशः)
- जयन्तभट्टः। *न्यायमञ्जरी* (द्वितीयो भागः) (हिन्दयनुवादकः आनन्दझा)। सम्पादकः किशोरनाथझाः। दरभङ्गा : कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः, २००२।
- दण्डी। *काव्यादर्शः* (मालिन्यप्रोञ्छनीसहितः)। सम्पादिका चिन्मयीचट्टोपाध्याया। कलिकाता : पश्चिमबङ्ग राज्य पुस्तक पर्षत्, १९९५।
- पतञ्जलिः। *व्याकरणमहाभाष्यम्* (प्रदीप-उद्योतटीकाभ्यां सनाथितम्) (द्वितीयो भागः)। सम्पादकः वेदव्रतसिद्धान्तशिरोमणिः। हरियाणा : हरयाणा साहित्य संस्थानम्, १९६३।
- पाणिनिः। *अष्टाध्यायी* । सम्पादकः गोपालदत्तपाण्डेयः। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०११।
- भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी*। सम्पादकौ गिरिधरशर्मा परमेश्वरानन्दशर्मा च। दिल्ली : मोतीलाल बनारसीदास, २०१४ (द्वादशं पुनर्मुद्रणम्) (१९६१, प्रथमसंस्करणम्)।
- विश्वनाथकविराजः। *साहित्यदर्पणः*। सम्पादकः कृष्णमोहनशास्त्री। वाराणसी : चौखम्भा संस्कृत संस्थान, २०६८ (विक्रमाब्दः) (पुनर्मुद्रणम्)।
- विश्वनाथन्यायपञ्चाननः। *भाषापरिच्छेदः* (न्यायसिद्धान्तमुक्तावलीसहितः)। सम्पादकः पञ्चाननभट्टाचार्यः। मेदिनीपुरम् : श्रीनाथभवन, १३७७ (बङ्गाब्दः)।


—